© 2018 IJSRST | Volume 4 | Issue 2 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section: Science and Technology

# अभिज्ञानशाकुन्तल नाटके पर्यावरण-विमर्शः

**साधना देवी**
**शोधच्छात्रा**
**इलाहाबाद विश्वविद्यालय**
**इलाहाबाद।**

लौकिक संस्कृत साहित्ये प्रायेण सर्वेषु ग्रन्थेषु पर्यावरण संरक्षणस्य श्लाघनीयः उपदेशः प्राप्यते। इत्थं शोधात्मक दृष्टया रचनाकाराणां रचनासु अन्तर्निहित पर्यावरणं समग्र दृष्टया अनुसंधात्मक रूपेण प्रस्तुतमस्ति यतो हि पर्यावरण प्रदूषणोपायोपैः अस्य महत्त्वपूर्णघटकानां संस्कृतस्य प्राचीनेषु अर्वाचीनेषु च काव्येषु अङ्कनं कृतम्।

राष्ट्रकवि कालिदास्य काव्येषु वृक्षाणां पर्यावरण संरक्षणस्य च अनेकानि असंख्य प्रमाणानि प्राप्यन्ते अस्य महाकवेः ग्रन्थेषु पदे पदे आहिमालयात् रत्नाकर पर्यन्तं तस्य मध्यवर्ती आर्यावर्तस्य एव चित्रणं नास्ति अपितु समस्त भारतवर्षस्य जम्बू द्वीपश्च संस्कृतिन्यासस्य स्तुति गानं मुखरितमस्ति अस्य अलौकिक सौन्दर्यमयी प्रकृतिः अतुलनीयं वैभवं आदाय अस्माकं समक्षं प्रस्तुतमस्ति। अस्माकं प्राचीने अर्वाचीने च वाङमये पर्यावरणस्य सुरक्षार्थं परोक्षा परोक्षयोः सामग्री वर्णिता अस्ति।

वृक्षारोपणे तेषां पूजा च धर्म धार्मिक दृष्टया परमं पवित्रं कर्तव्यं कथितं वृक्षाणां सेवा तेषां रक्षणं च पुण्य दायकं मन्यते यज्ञानुष्ठानं वापी कूपतड़ागानां निर्माणं वन संरक्षणादि कार्याणि भारतीया नाम पुण्यमयं कर्तव्यं वर्णितं, वृक्षाणां संरक्षणं जलासपानांजलस्य प्रदूषणं स्मृतिषु कर्तव्य रूपेण निर्धारितं गङ्गा यमुनादि नदीनां जलस्य महिमा न केवलं वैदिक संस्कृते अपितु पुराणेषु महाकाव्येस्वपि कर्तव्यरूपेण निर्धारणं कृतम् पर्यावरण सुरक्षा प्रसङ्गः संस्कृत साहित्ये वृक्षारोपणे सेचनादि कर्मणि सुस्पष्ट रूपेण अनेकेषु स्थलेषु दृश्यते महाकवयः नदी नद सरोवर समुद्रादीन उपमानरूपे वर्णिताः अस्माकं संस्कृतौ प्रकृतेः मानवस्य अभेभ्यः सम्बन्धः दर्शितः प्राणिषुदया पशु पक्षिषु स्नेहः वृक्ष लता पुष्पादिषु आत्मीय भावः च प्रकृत्या सः अस्माकं अविच्छिन्नं सम्बन्धं प्रमाणी कुर्वन्ति। पर्यावरण सुरक्षायाः उदाहरणानि सर्वत्र संस्कृत वाङमये दृश्यन्ते यज्ञ धूमेन वातावरणं शुध्यति यज्ञानां सविस्तारं वर्णनं वैदिकसंस्कृते मनुस्मृतिषु च सर्वत्र दृश्यते।

कालिदासस्य विश्व प्रसिद्धस्य अभिज्ञानशाकुन्तल नाटकस्य अध्ययनेन ज्ञायते यत् अयं महाकविः अस्य नाटकस्य आदौ एव मङ्गलाचरणे लिखिते श्लोके पर्यावरणं प्रति संकीर्तनं करोति।

तथाहि–

**याया सृष्टिः स्त्रुष्टुराद्या, वहति विधिहुतं या हविर्या च होत्री**

**ये द्वे कालं विद्यतः, श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**

**यामाहुः सर्वबीजप्रकृतिरिति यथा प्राणिनः प्राणवन्तः।**

**प्रत्याक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।**[1]

अयं श्लोकः अष्टरूपधारि भगवतः शिवस्य स्तुतौ प्रकृतेः मूलतत्वानि वर्णयति। अस्मिन्नेव नाटके वैखानसेन राजा दुष्यन्तः मृगस्य मृगायाः वारितः–

**भो भो राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।**[2]

आश्रम मृगः न्यपराधत्वात् अबध्यः अस्ति। आश्रमातु पर्यावरण परिरक्षणाय एव महत्त्वपूर्णाः आसन राजा दुष्यन्तः प्रथमाङ्के एव रक्षात् आवततार पुनः आश्रमे एकाकी एव प्रविशति यतो हि स सेनः यदिसः तत्र प्रविसति तपोवन निवासीनां उपरोधः भविष्यति समिधा हरणं, हवन क्रिया यज्ञकरणं वाल्मीकेः आश्रमे नित्य क्रिया कलापरूपेण क्रियन्ते यज्ञैः परिजन्याः भवन्ति परिजन्यावृष्टि भवति वृष्टेः अन्नोतपपादनं भवति।

तपोवनेषु ऋषयः फलानि नीवारान् च असेवन्त ते नदीनां जलं अपिवन आश्रमेषु मृगाः अहन्तव्याः आसन् यतो हि ते दुष्यन्तस्य रसशब्दं श्रुत्वापि अभिन्न गतयः आसन् ऋषि मुनयः जलाशयेषु स्नात्वा तेषां जलं पीत्वा स्वजीवन निर्वाहं अकुर्वन् यथा–

**नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामथः**

**प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्तः एवोपलाः।**

**विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा**

**स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः।।**[3]

आश्रमाः असंसयं पर्यावरण संरक्षणस्य आधार स्तम्भाः सन्ति तत्र प्रकृति प्रदत्तं सर्वेषां वस्तूनां सुलभता तेषां वैशिष्टयं च स्वतः सिद्धाः मृगाणां निर्भीगता इङ्गुदीफल प्रयोगः प्रकृति सौन्दर्यान्यकस्य पर्यावरण संरक्षणस्य च सन्देश ददादि अस्माभिरपि प्राकृर्तिवस्तुनां सुरक्षा करणीया। कण्व दुहिता शकुन्तला प्रकृत्यां अतिस्नेहं अकरोत् तस्याः सौन्दर्यस्य तुलना नवमालिका पुष्पैः कृता आश्रम पादपानां आलवाल पूरणेशकुन्तला प्रसन्ना आसीत्। यतो हि तस्या वृक्षेषु पुष्पेषु च महानुरागः आसीत्।

शकुन्तलायाः सौन्दर्यस्य तुलना प्राकृत्याः उपादानैः यथाः –

**अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।**

**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्।।**[4]

शकुन्तलायाः आश्रमपादपेषु सोदर स्नेहः अस्मान् प्रकृत्या सः आचरणाय शिक्षयति कालिदासेन प्राकृतिक वस्तुनां अनेक स्थलेषु वर्णनं तानि वस्तूनि प्रति अभेदयं सम्बन्धं दर्शयति अभिज्ञान शाकुन्तलस्य प्रथमे अङ्के सौन्दर्यं वर्णयन महाकविः लिखति–

**सरसिजमनुविद्धं शैवलेनापि रम्यं**

**मलिनमपि हिमांशोर्लक्ष्म लक्ष्मी तनोति।**

**इयमधिकमनोज्ञा वल्कलेनापि तन्वी**

**किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।**[5]

पर्यावरण सुरक्षायैः न केवलं वृक्षारोपणं आवश्यकमपि अपितु तेषां पोषणमपि अत्यावश्यकं प्राकृतिः परिवेशस्य विविधानां अङ्गानां सूक्ष्मावलोकनेन मानव पर्यावरणस्य प्रगाढ सम्बन्धानां समाकलनं पर्यावरणं प्रति च मानवेन करणीया करणीय विवेकस्य विषये वैदिक युगादेव भारतीय संस्कृतिः सदैव प्रयत्नशीला आसीत्।

अथर्ववेदे– **'माता भूमेः पुत्रोऽहं पृथिव्याः'**[6]

इति वाक्यं प्रकृतिं प्रति सम्मानं प्रदर्शयति वनस्पतीनां उपयोगिता वैदिक संस्कृते प्राप्यते। पुराणेस्वपि वृक्षानां पूजा तेषां प्रति आदरः सर्वत्र वर्णते। स्नानस्य पश्चाद् अश्वत्थवृक्ष स्पर्शाः तस्य दर्शनं स्नानस्य पश्चात् वृक्षेषु जल सेचनं सिद्धं करोति यत् प्रकृत्यां मानवानां परमादरः आसीत्।

अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के वर्णनं अस्ति यत आभरण प्रिया शकुन्तला स्नेहेन पादपानां पल्लवं न आदत्तेस्म अमन्यत् किमिदं प्रकृतौ स्नेह नास्ति–

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**

**नादत्ते प्रिय मण्डनाऽपि भवतां स्नेहेन या पल्लवम्।**

**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**

**सेयं याति शकुन्तलापतिगृहं सर्वैरनुज्ञायताम्।।**[7]

वन्यजीवेषु प्रेम तान् प्रति महत आकर्षणं आसीत् यथा–

**गहन्तां महिषा निपान सलिलं शृङ्गैर्मुहुस्ताडितं**

**छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।**

**विश्रब्धं कियतां व राहततिभिर्मुस्ताक्षतिः पल्वले**

**विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मदधनः।**[8]

तृतीयेऽङ्केपि कण्व शिष्यः यज्ञ कर्मणः चर्चा कुशान् वेदि संस्तणाथंस्य वर्णनं कृतं–

**यावदिमान्वेदिसंस्तरणार्थं दर्भानृत्विग्भ्य उपहरामि।**[9]

वा–

**"अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**

**यज्ञाद् भवन्ति पर्जन्योयज्ञः कर्म समुद्भवः।।**[10]

अभिज्ञानशाकुन्तल नाटके सायं यज्ञस्य दृष्टान्तः प्राप्यते यज्ञः एकतः प्रदूषक निवारकः अन्यतः ऋषीणां आवश्यकं कर्ममपि निर्धारितमासीत्। यज्ञेन सन्ध्या काले यज्ञस्थलस्य वातावरणं अतिपरि शुद्धं अनेकैः रोगैः रहितं यथा–

**सायन्तेन सवनकर्मणि संप्रवृत्ते**

**वेदिं हुताशनवतीं परितः प्रयस्ताः।**

**छायाश्चरन्ति बहुधा भयमाद धानाः**

**सन्ध्यापयोदकपिशाः पशिताशनानाम्।।[11]**

संस्कृत साहित्ये पर्यावरणस्य संरक्षणस्य सर्वाधिकः पक्षः अस्य नाटकस्य चतुर्थेऽङ्के परिलक्ष्यते। तपोवनस्य प्रत्येक लता शकुन्तलायाः भगिनी प्रत्येक पादपः तस्याः भ्राता पशु पक्षिणः तस्याः पुत्र पुत्रि रूपेण प्रस्तुताः सन्ति एकं शास्वत सत्यं प्रति चन्द्रसूर्यौ उपमान रूपेण वर्णितौ–

**यात्येकतोऽस्तशिखरं पतिरोषधीना–**

**माविष्कृतोऽरूणपुरः सर एकतोऽर्कः।**

**तेजोद्वयस्य युगपदत्यसनोदयाभ्यां**

**लोको नियम्यत इवात्मदशान्तरेषु।।[12]**

वैतान वह्नीनां उल्लेखः पर्यावरण शुद्धिरूपेकृतः –

**अमी वेदि परितः क्लृप्तधिष्ण्याः।**

**समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।**

**अपध्नन्तो दुरितं हव्यगन्धै**

**वैंतानास्त्वां वह्नयः पावयन्तु।।[13]**

अभिज्ञानशाकुन्तलस्य एभिः उदाहरणैः कालिदासस्य पर्यावरण सुरक्षा च प्रामणी कृतौ वनदेवताः शकुन्तलायाः प्रतिगृह गमनकाले तस्यै उपदेशं ददति यथा–

**रम्यान्तरः कमलिनीहरितैः सरोभिः श्छाया द्रमैर्नियमितार्कमयूख तापः।**

**भूयात् कुशेशयरजोमृदुरेणुरस्याः शान्तानुकूलपवनश्च शिवश्च पन्थाः।।[14]**

कालिदासस्य प्रकृत्या सः अभेद्य सम्बन्धस्य उदारहणं दृश्यते यथा–

**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।[15]**

निःश्रृता तथैव महाकवेः कालिदास्य विलापेन अभिज्ञानशाकुन्तलस्य नाटकस्य सृष्टिः अभवत् –

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**

**कण्ठः स्तम्भितवाष्पवृतिकलुषश्चिन्ताजडं दर्शनम्।**

**वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः**

**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः।।[16]**

पर्यावरण संरक्षणस्य सूक्ष्मदृष्टया अवलोकनेन ज्ञायते यत् अस्माकं राजानः प्रकृतिं पर्यावरणं प्रति च सदैव उद्यताः आसन् –

**किं तावद् व्रतिनामुपोढतपसांविघ्नैस्तपोदूषितं**

**धर्मारण्यचरेषु केनचिदुत प्रणिष्व सच्वेष्टितम्**

**आहोस्वित् प्रसवो ममापचरितैर्विष्टाम्भितो वीरन्धा**

**मित्यारूढबहु प्रतर्कमपरिच्छेदाकुलं मे मनः।**[17]

प्रकृतेः उपादानानि यथा वृक्षाः पयोदाः नद्यः मनुष्यान् परोपकाराय उपदिशन्ति यथा–

**भवन्तिनमास्तरवः फलागमै**

**र्नवाम्बुर्धिदूरतिलम्बिनो घनाः।**

**अनुद्धताः सत्पुरूषाः समृद्धिभिः**

**स्वभाव एवैष परोपकारिणाम्।।**[18]

वन्यजीवानां निष्कपटं स्वभावः दुष्यन्तेन शकुन्तलां वनवासिनीम् कथित्वा सिद्धं करोति यत् सा पर्यावरण संरक्षणस्य सदैव सन्नद्धा आसीत् –

*तत्क्षणे स मे पुत्रकृतको दीर्घापांगो नाम मृगपोतकः उपस्थितः। त्वयायं प्रथमं पिबत्वित्यनुकम्पिनोपच्छन्दित उदकेन। न पुनस्तेऽपरिचया द्धस्ताभ्याशमुपगतः। पश्चान्तष्मिन्नेव मया गृहीते सलिलेऽनेन कृतः प्रणयः। तदा तमित्थं प्रहसितोऽस्मि। सर्वः सगन्धेषु विश्वसिति द्वयप्य त्रारण्यकाविति।*[19]

कालिदासेन दासी द्वारा ऋतुराज वसन्तस्य मनोहारि वर्णनं कृतं दासी कथयति यत् वसन्तमासः जीवनसर्वस्वमस्ति आम्रवृक्षाः तेषां किसलयानि दारूणि आयुर्वेद शास्त्रे महत्त्व पूर्णानि सन्ति यथा–

**आताम्रहरति पाण्डुर जीवितं सत्यं वसन्तमासस्य।**

**दृष्टोऽसि चूतकोरक ऋतुमङ्गल त्वां प्रसादयामि।।**[20]

अभिज्ञानशाकुन्तलस्य षष्ठेऽङ्के एकस्मिन्नचित्रे विभिन्न प्राकृतिक वस्तूनां चित्रणं प्रकृति महिमानं पर्यावरण रक्षणं च उल्लेखयति–

**कार्या सैकतलीनहंस मिथुना स्त्रोतोवहामालिनी**

**यादास्तामभितो निषण्णहरिणागौरीगुरोः पावनाः।**

**शाखालम्बितवल्कलस्य च तरोनिर्मातुभिच्छाम्यद्यः**

**शृङ्गे कृष्णमृगस्य वाम नयनं कण्डूयमानांमृगीम्।।**[21]

अभिज्ञानशाकुन्तलस्य सप्तमे अङ्के परिवः नामकः वायुमार्गः उल्लिखितः अस्ति अयमेव मार्गः अन्तरिक्षे प्रवमाणानां अङ्कां धारयति महाभारते वायो सतविधः मार्गाः वर्णिताः –

***आवहः प्रवहश्चैव तथैवानु वहः परः।***

***संवहो विवहश्चैव तदूर्ध्वस्यात् परावहः तथा***

***परिवहश्चोर्ध्वं वापोर्वै सप्तमनेमयः।***

अनेन परिवः नामक वायोः हेतोः भगवान विष्णु वामनावतारयं धृत्वा द्वितीय पादन्यासेन समस्तं अन्तरिक्षं विममे तदा अयमेव मार्गः तस्य एव पादन्यासेन पवित्रः अभवत्–

**त्रिस्त्रोतसं वहति यो गगन प्रतिष्ठां**
**ज्योतींषि वर्तयति च प्रविभक्तरश्मि।**
**तस्य द्वितीय हरिविक्रमनिस्तमस्कं**
**वायोरिमं परिवहस्य वदन्ति। मार्गम्।।**[22]

वायुमण्डलस्य विशेष वर्णनं वायुपुराणे ब्रह्माण्ड पुराणे च उपलभ्यते दुष्यन्तः मेघमार्गस्यवर्णनं कुर्वनं पर्यावरण भावं महत्वपूर्वं करोति।

यथा— **अयमरविवरेभ्यश्चातकैर्निष्पतद्भि**
**र्हरिभिरचिरभासां तेजसा चानुलिप्तः।**
**गतमुपरिघनानां वारिगर्भोदराणां**
**पिशुनयति रथस्ते शीकर क्लिन्ननेमि।।**[23]

राजा मालतीं कथयति यत् ये तपोवनमुनिजनाः निवसन्ति ते वृक्षन्यास इव सुरक्षितान कुर्वन्ति।

सप्तमेऽङ्के सरोवर जलानां स्वर्णकमल परागेण, पीतं सुगन्धितं च वर्णितं मुनयः तस्मिन स्नानं च कुर्वन्ति अपितु धार्मिक क्रियाभ्यः एव तस्य जलस्य प्रयोगं अकुर्वन् अर्थात् जलं अमृतं अस्ति अयं भावः ऋषेणां मुनीनां च हृदये आसीत्।

महाकविः ऋषीणां इव सर्वान् तेषां सदृशं आचरणं कर्तुं निदिशति—

**प्राणानामनिलेन वृत्तिचिता सत्कल्पवृक्षेवने,**
**तोये काञ्चन पदमरेणुकपिशेधर्माभिषेकक्रिया**
**ध्यानं रत्नशिलातलेषु विबुध स्त्री संनिधी संयमो**
**यत्कांक्षन्ति तपोभिरन्यमनुयस्तस्मिस्त पश्यन्त्यमयी।**[24]

तृतीय आश्रमस्य वानप्रस्थाश्रमाय वनानां वृक्षाणां च महत् महत्मस्ति आयुर्वेदीयौपषधीयनां जातिकर्मणि उपयोगश्च प्रमाणामि सन्ति अपराजिता औषधिः नेत्र रोग निदानाय, विषरोग विनाशाय मस्तकशूलदूरीकरणाय च अन्येशां रोगाणां कृते महत्वपूर्णा आसीत् सर्वदमन इति नाम पर्यावरण विनाशकस्य प्रतीकमस्ति किन्तु भविष्ये स एव जीवानां भरण पोषण करणेन पर्यावरण रक्षकत्वात् च भरत नाम्ना प्रसिद्धाभवत् अतः अस्याभिः सर्वैरपि प्रकृति संरक्षणम् विधेयम्।

## सन्दर्भ—सूची


1. अभिज्ञानशाकुन्तलम्—1/1 (मङ्गलाचरण)

2. अभिज्ञानशाकुन्तलम्–कपिलदेवद्विवेदी, पृष्ठ सं0 25
3. अभिज्ञानशाकुन्तलम्–1/14
4. अभिज्ञानशाकुन्तलम्–1/21
5. अभिज्ञानशाकुन्तलम्–1/20
6. अथर्ववेद, पृथ्वी सूक्त, 12/10
7. अभिज्ञानशाकुन्तलम्–4/9
8. अभिज्ञानशाकुन्तलम्–2/6
9. अभिज्ञानशाकुन्तलम्, तृतीय अङ्क, पृष्ठ सं0 133, कपिलदेव
10. श्रीमद्भगवद्गीता, 3/14
11. अभिज्ञानशाकुन्तलम्–3/24
12. अभिज्ञानशाकुन्तलम्–4/2
13. अभिज्ञानशाकुन्तलम्–4/8
14. अभिज्ञानशाकुन्तलम्–4/11
15. ध्वन्यालोक– 1/5
16. अभिज्ञानशाकुन्तलम्–4/6
17. अभिज्ञानशाकुन्तलम्–5/9
18. अभिज्ञानशाकुन्तलम्–5/12
19. अभिज्ञानशाकुन्तलम्, पञ्चम अङ्क, पृष्ठ सं0 285, सू0 79 (कपिलदेव द्विवेदी)
20. अभिज्ञानशाकुन्तलम्–6/2
21. अभिज्ञानशाकुन्तलम्–6/17
22. अभिज्ञानशाकुन्तलम्–7/6
23. अभिज्ञानशाकुन्तलम्–7/7
24. अभिज्ञानशाकुन्तलम्–7/12